क्र सं०

विषयः कर्मकाण्ड

प्रवेश सं० २८००४

ग्रन्थकार

नाम सामान्य मूर्ति प्रतिष्ठा

पत्र सं० १-५

अक्षर सं० (पंक्तौ) २२

पंक्ति सं० (पृ०) ८

श्लोक सं०

आधार: का.

लिपि: दे. ना.

आकार: ७.२. × २. = .

009585

वि० विवरणम् पू.

ना. ३ ७५/५६६

सी० एम० यू० पी०—९७ एस० सी० ई०—१६५१—५० ०००

Indira Gandhi National Centre for the Arts

। ।

॥श्रीगणेशाय नमः॥अथ विष्णुमुख्यानां चलप्रतिष्ठा॥प्रयोगो
मीधीयते॥उक्तकाले शुभदिने यजमान भार्यया सहप्राङ्मुखउप
विश्याचम्य प्राणानायम्य संकल्पवाक्यम् आर्य आत्मनः सकुवका
लां श्रुरारोग्यपुत्रपौत्रधनधान्यादि अखिलषितसमृद्धिकाम
नया अमुकदेवप्रतिष्ठां करिष्ये तदंगत्वेन गणेशपूजन स्वस्तिपु
ण्याहवाचन मातृकापूजनं नांदीश्राद्धं आचार्यब्रह्मर्त्विग्वर
णां तं कृत्वा तद्देवतामूलमंत्रेण न्यासं कुर्यात्॥ ततः ॐ आपो हिष्ठेति
मंत्रेण कुशोदकेन यागभूमिं संप्रोक्ष्य ततो गौरसर्षपादि विकी

Indira Gandhi National
Centre for the Arts

॥१॥ र्य॥ देवाः आयांतु यातुधानाः अपयांतु विष्णुजगद्रक्षायै विष्णुं
नमस्कृत्य संविष्टो देवयजनं रक्षस्वेति चक्रमुद्रया रक्षां कृत्वा प्रा
र्थयेत्॥ स्वागतं स्वागतं देव देवेश विश्वरूप नमोऽस्तु ते॥ शुद्धेऽपि लेऽद्य वि
ष्ठाने शुद्धिकर्मसहस्व भो इति प्रार्थ्य देवताधिष्ठानमभ्युक्ष्याग्न्यु
त्तारणं कुर्यात्॥ अग्निर्मूर्द्धेति मंत्रेण मद्भिः शुद्धोदकेन प स्नायहे
तिकपार्थे॥ शुद्धोदकेन। तत्सवितुरिति गोमूत्रेण जलांतरितेनाजं
य द्वारा मिति गोमयेन। देवं पीठे संस्थाप्य। देवस्य पुरतः पंचक
लशान् धान्योपरि आजिघ्रेति स्थापयेत्॥ वरुणस्योत्तंभन

॥२॥

मसीति उदकं पूरयेत्॥ तेषु कलशेषु कुंकुमदूर्वाक्षताचंदनसर्षपा
दिहिरण्यं तुलसीं प्रक्षिप्य॥ ततः पंचकलशैः पंचदेवैः॥ नमः
शंभवेति प्रथमेन। इदमापः शुचिव इति द्वितीयेन॥ याते रुद्रेति तृ
तीयेन। विष्णोरराटमिति चतुर्थेन। ब्रह्मजज्ञानमिति मंत्रेण पंचमे
न। स्नाप्य। गंधादिभिः। संपूज्य। हस्तेकंकणं बध्वा। वस्त्रे
णाच्छाद्य जले प्राक् शिरसं देवं संस्थाप्य॥ मंगलघोषेण उत्ति
ष्ठ ब्रह्मणस्पते इति देवं उत्थाप्य। करकंकणं विस्यासं वेष्टित वस्त्रं
विसृज्य॥ नीजैरीनं द्वा पीठे संस्थाप्य। सुवर्णशलाकाना

Indira Gandhi National
Centre for the Arts

।।२।।

पायप्रक्षाल्य एषतः स्थित्वा कुशसहितशलाकां गृहीत्वा घृते
न। चित्रं देवानामिति मंत्रेण दक्षिणनेत्रोन्मीलनं कृत्वा तच्छला
कां प्रक्षाल्य पुनः पूर्ववत् शलाकां गृहीत्वा तच्चक्षुरिति मंत्रेण
वामनेत्रोन्मीलनं। नेत्रोन्मीलिते देवस्य पुरतः कश्चित्न
तिष्ठेत्।। देवस्य चित्राजं दर्शयेत्।। आदर्शं च दर्शयेत्।। दे
वस्य सन्मुखो भूत्वा संपुटीकृत्य उद्वयमिति मंत्रेण स्तुतिं
कृत्वा। देवस्य पुरतः पंचकलशान् स्थापयित्वा शुद्धजलेन पू
रयित्वा। तेषु कलशेषु कुशदूर्वाक्षताचंदनगोरसर्षपा

।।२।।

हिरंण्य तुलसी प्रक्षेपयित्वा।। मुद्रां प्रदर्श्य सुदर्शनमंत्रेण प्र
त्येकं शतवारं अभिमंत्र्य। ॐ नमो भगवते भो भो सुदर्शनच
क्र दुःस्वप्नं दारय दारय दुरितं हन हन पापं मथ मथ आरोग्यं
कुरु कुरु हां हां हुं हुं फट् स्वाहा।। चतुर्भिर्ब्राह्मणैः चतुःक
लशैः विष्णुसूक्तेन अभिषेचयित्वा पंचकलशोदकेन
सुदर्शनमंत्रेण अष्टोत्तरशतवारं देवमभिषिंच।। अथ वस्त्रेण
वेष्टयेत्।। नीराजनं कृत्वा एकं कलशं सजलं गृहीत्वा आदि
त्यमंडलं तत्सलिले दत्त्वा तस्मिन्नमल मंत्रेणावाह्य तत्स्थि

॥३॥ माचिं बतज्जले अवलोक्यत दुदकं देवस्य मूर्द्धि क्षिपेत्॥ संवेष्ठित
वस्त्रं विसृज्य। मूल मंत्रेण षडंगं न्यासं कृत्वा देवस्य पुरतः
सप्तदश। कलशाराधनं कुर्यात्॥ आदौ देवस्य सर्व संधिषु प्र
त्येकं मूल मंत्रेण जपेत्॥ आनखादि मूल मंत्रेण संस्पृशेत्॥ दे
वं सांनिध्यं प्रार्थयेत्॥ सांनिध्यं कुरु देवेश सर्व संपत्करो
ममल क्ष्म्या सह जगन्नाथ धरया सह मूर्द्धग॥१॥ सान्नि
ध्यं कुरु देवेश सर्वदा सर्व कामद। द्रव्य शक्ति क्रिया भक्ति भेद
दीनि सह प्रभो॥२॥ सांनिध्यार्थं मूल मंत्रं अष्टोत्तर सहस्त्र
॥३॥

जपेत्॥ ततः सप्तदश कलशान् प्रतिष्ठाप्य। पुनः एकं वृहत्कलशं प्रति
ष्ठाप्य। पुनर्देवस्य पूर्वादि दिक्षु विदिक्षु द्वौ द्वौ कलशौ प्रतिष्ठाप्य शुद्ध
जलेन पूरयित्वा पंचपल्लवानि क्षिप्य पूर्व स्थापित सप्तदश कल
शेषु शुद्धोदकेन पूरयित्वा। प्रथम कलशे दूर्वा विष्णुक्रांता श्यामा
क पद्म पत्राणि निक्षिप्य॥ द्वितीय कलशे कुशाग्राणि तिल सर्षपाः॥
तृतीये यव गंधाक्षत फलानि॥ चतुर्थे पंचगव्यं। पंचमे घृतं। षष्ठे द
धि सप्तमे क्षीरं अष्टमे मधु। नवमे संस्कारोदकं। दशमे उष्णोदकं।
एकादशे यन्त्रलोदकं॥ द्वादशे खर्जूरोदकं॥ त्रयोदशे अक्षतोदकं।
चतुर्दशे रत्नोदकं पंचदशे लोहोदकं। षोडशे गंधोदकं। सप्तदशे

हरि शङ्खपूर्णस्वर्णपूतोदकं॥ तुलसीमिश्रितोदकं। इदं विष्णुरिति मंत्रे
ण सर्वकलशेषु निक्षिपेत्॥ अन्यः अष्टादशफलशेषु पूर्वोक्तसंभारा
न्निक्षिप्य। प्रतिष्ठाप्य। अष्टादशकलशान् मूलमंत्रेण षोडशोपचा
रान्कृत्वा। सहस्रशीर्षेति सूक्तेन पुरुषैः षोडशभिः पात्रस्थोदकैः देव
स्य मूर्ध्न्यभिषेकं कुर्यात्॥ सप्तदशपात्रस्थहरिंदाचक्रेण सुदर्शन
मंत्रेण देवस्योद्वर्तनं कुर्यात्॥ ततो नारिकेलोदकेन प्रणवेन देवस्य स्न
पनं कृत्वा। शुद्धोदकेन प्रक्षाल्य। वृहत्कलशोदकेन। अग्निरिंद्रश्चेति सू
क्तेन पवमानसूक्तेन विष्णुसूक्तेन हरिसूक्तेन मधुसूक्तेन पुरुषसूक्ते
न देवस्याभिषेकं कुर्यात्॥ देवस्य नीराजनं कृत्वा छत्रादि देवस्य समंता ॥४॥
द्दीपान् प्रज्वाल्य॥

॥ततः कलशार्चनं शास्त्रार्चनं पीठार्चनं मधुपर्कादि अभि
॥षेकांतं कृत्वा। आदर्शपूजां कृत्वा आदर्शपूजां कृत्वा॥ दे
॥वस्य षोडशोपचारैः संपूज्य पीठांतरे देवं स्थापयित्वा॥ देव
॥स्य पश्चिमभागे स्वशाखोक्तप्रकारेणाग्निं स्थापयित्वा॥
॥ब्रह्मोपवेशनाद्याज्यभागांते मूलमंत्रेणाष्टोत्तरशतं तेन घृ
॥तेन जुहुयात्॥ देवं उछाप्य नैवेद्यं दत्वा देवमग्निमध्ये मू
॥लमंत्रेणाष्टोत्तरशतं जपेत्॥ ततो देवं धान्योपरि स्थापयित्वा
॥पुनः मूलमंत्रेणा घृतेन षोडशाहुतिर्जुहुयात्॥ ॐ आं ह्रीं क्रों
॥यं रं लं वं शं षं सं हं सः॥ अमुष्य प्राणाः इह प्राणाः अमुष्य जीव
॥इह स्थितः। अमुष्य सर्वेंद्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्रा

।।५।। ।।ण प्राणइहैवा।।सुसुखंचिरंतिष्ठंतुस्वाहा।।इतिप्राणप्रतिष्ठां
।।विधाय।।स्विष्टकृतादिहोमशेषंसमाप्य महानैवेद्या
।।दिसर्वपूजांकुर्यात्।। आचार्यब्रह्मऋत्विकपूजांकृत्वा
।।यथायोग्यंदक्षिणांदत्वायथाशक्तिब्राह्मणान्भोज
।।यित्वास्वयंभुंजीतेति।। ।।इतिमूर्त्तिप्रतिष्ठासामान्या
।।समाप्ता।। ।।चिंतामणेरियंमूर्त्तिप्रतिष्ठा।।

।।हेपुस्तकराजऋषीचहोय।।



Indira Gandhi National Centre for the Arts